देवः। अर्यः। गृत्सं। राये। कविऽतरः। जुनाति। अयं। सु। तुभ्यं। वरुण। स्वधाऽवः। हृदि। स्तोमः।
उपऽश्रितः। चित्। अस्तु। शं। नः। क्षेमे। शं। ऊं इति। योगे। नः। अस्तु। ० ॥ ८ ॥ ॥ रदत्। पथः। व
रुणः। सूर्याय। प्र। अर्णांसि। समुद्रिया। नदीनां। सर्गः। न। सृष्टः। अर्वतीः। ऋतऽयन्। चकार।
महीः। अवनीः। अहऽभ्यः। आत्मा। ते। वातः। रजः। आ। नवीनोत्। पशुः। न। भूर्णिः। यवसे।
ससऽवान्। अंतः। मही इति। बृहती इति। रोदसी इति। इमे इति। विश्वा। ते। धाम। वरुण। प्रि

राम ॥५८॥

यानि। परि। स्पशः। वरुणस्य। स्मत्ऽइष्टाः। उभे इति। पश्यंति। रोदसी इति। सुमेके इति
सुऽमेके। ऋतऽवानः। कवयः। यज्ञऽधीराः। प्रऽचेतसः। ये। इषयंत। मन्म। उवाच। मे। वरु
णः। मेधिराय। त्रिः। सप्त। नाम। अघ्न्या। बिभर्ति। विद्वान्। पदस्य। गुह्या। न। वोचत्। युगा
य। विप्रः। उपराय। शिक्षन्। तिस्रः। द्यावः। निऽहिताः। अंतः। अस्मिन्। तिस्रः। भूमीः। उप
राः। षट्ऽविधानाः। गृत्सः। राजा। वरुणः। चक्रे। एतं। दिवि। प्रऽईखं। हिरण्ययं। शु
भे। कं। अव। सिंधुं। वरुणः। द्यौःऽइव। स्थात्। द्रप्सः। न। श्वेतः। मृगः। तुविष्मान्। गं
भीरऽशंसः। रजसः। विऽमानः। सुपारऽक्षत्रः। सतः। अस्य। राजा। यः। मृळयाति। चकु
षे। चित्। आगः। वयं। स्याम। वरुणे। अनागाः। अनु। व्रतानि। अदितेः। ऋधंतः। ०॥
॥ २ ॥ ॥ प्र। शुंध्युवं। वरुणाय। प्रेष्ठां। मतिं। वसिष्ठ। मीळ्हुषे। भरस्व। यः। ईं। अर्वांचं
। करति। यजत्रं। सहस्रऽमघं। वृषणं। बृहंतं। अध। नु। अस्य। संऽदृशं। जगन्वान्। अ

ग्नेः।अनीकं।वरुणस्य।मंसि।स्वः।यत्।अश्मन्।अधिऽपाः।ऊं इति।अंधः।अभि।मा।
वपुः।दृशये।निनीयात्।आ।यत्।रुहाव।वरुणः।च।नावं।प्र।यत्।समुद्रं।ईरयाव।म
ध्यं।अधि।यत्।अपां।स्नुऽभिः।चराव।प्र।प्रऽईंखे।ईंखयावहै।शुभे।कं।वसिष्ठं।ह
।वरुणः।नावि।आ।अधात्।ऋषिं।चकार।सुऽअपाः।महःऽभिः।स्तोतारं।विप्रः।सुदि
नऽत्वे।अह्नां।यात्।नु।द्यावः।ततनन्।यात्।उषसः।कं।त्यानि।नौ।सख्या।बभूवुः।
सचाऽवहेइति।यत्।अवृकं।पुरा।चित्।बृहंतं।मानं।वरुण।स्वधाऽवः।सहस्रऽद्वारं।ज
गम।गृहं।ते।यः।आपिः।नित्यः।वरुण।प्रियः।सन्।त्वां।आगांसि।कृणवत्।सखा।
ते।मा।ते।एनस्वंतः।यक्षिन्।भुजेम।यंधि।स्म।विप्रः।स्तुवते।वरूथं।ध्रुवासु।त्वा।आ
सु।क्षितिषु।क्षियंतः।वि।अस्मत्।पाशं।वरुणः।मुमोचत्।अवः।वन्वानाः।अदितेः।
उपऽस्थात्।०॥१०॥ ॥मोइति।सु।वरुण।मृत्ऽमयं।गृहं।राजन्।अहं।गमं।मृळ।सुऽ

राम
॥५८॥

क्षत्र। मृळय। यत्। एमि। प्रस्फुरन्ऽइव। दृतिः। न। ध्मातः। अद्रिऽवः॥ क्रत्वः। समह। दीन
ता। प्रति। ईपं। जगम। शुचे॥ अपां। मध्ये। तस्थिऽवांसं। तृष्णा। अविदत्। जरितारं॥ य
त्। किं। च। इदं। वरुण। दैव्ये। जने। अभिऽद्रोहं। मनुष्याः। चरामसि। अचित्ती। यत्। तव। ध
र्म। युयोपिम। मा। नः। तस्मात्। एनसः। देव। रिरिषः॥ ११ ॥ ॥प्र। वीरऽया। शुचयः। दद्रिरे। वां।
अध्वर्युऽभिः। मधुऽमंतः। सुतासः। वह। वायो इति। निऽयुतः। याहि। अच्छ। पिब। सुतस्य।
अंधसः। मदाय। ईशानाय। प्रऽहुतिं। यः। ते। आनट्। शुचिं। सोमं। शुचिऽपाः। तुभ्यं। वायो इ
ति। कृणोषि। तं। मर्त्येषु। प्रऽशस्तं। जातःऽजातः। जायते। वाजी। अस्य। राये। नु। यं। जज्ञतुः
। रोदसी इति। इमे इति। राये। देवी। धिषणा। धाति। देवं। अध। वायुं। निऽयुतः। सश्चत। स्वाः।
उत। श्वेतं। वसुऽधितिं। निरेके। उक्षत्। उषसः। सुऽदिनाः। अरिप्राः। उरु। ज्योतिः। विविदुः
दीध्यानाः। गव्यं। चित्। ऊर्वं। उशिजः। वि। वव्रुः। तेषां। अनु। प्रऽदिवः। सस्रुः। आपः। ते। स

स्येन। मनसा। दीध्याना:। स्वेन। युक्तास:। क्रतुना। वहंति। इंद्रवायूइति। वीरऽवाहं। रथं। वां। ईशानयो:। अभि। पृक्ष:। सचंते। ईशानास:। ये। दधते। स्व:। न:। गोभि:। अश्वेभि:। वसुऽभि:। हिरण्यै:। इंद्रवायूइति। सूरय:। विश्वं। आयु:। अर्वत्ऽभि:। वीरै:। पृतनासु। सह्यु:। अर्वंत:। न। श्रवस:। भिक्षमाणा:। इंद्रवायूइति। सुस्तुतिऽभि:। वसिष्ठा:। वाजऽयंत:। सुऽअवसे। हुवेम। ०॥ १२ ॥ ॥ कुवित्। अंग। नमसा। ये। वृधास:। पुरा। देवा:। अनवद्यास:। आसन्। ते। वायवे। मनवे। बाधिताय। अवासयन्। उषसं। सूर्येण। उशंता। दूता। न। दृभाय। गोपा। मास:। च। पाथ:। शरद:। च। पूर्वी:। इंद्रवायूइति। सुऽस्तुति:। वां। इयाना। माऽऊर्कं। ईट्टे। सुवितं। च। नव्यं। पीव:ऽअन्नान्। रयिऽवृध:। सुऽमेधा:। श्वेत:। सिसक्ति। नियुत्। अभिऽश्री:। ते। वायवे। सऽमनस:। वि। तस्थु:। विश्वा। इत्। नर:। सुऽअपत्यानि। चक्रु:। यावत्। तर:। तन्व:। यावत्। ओज:। यावत्। नर:। चक्षसा। दीध्याना:। शुचिं। सोमं। शुचिऽ

पा। पातं। अस्मेइति। इंद्रवायूइति। सदतं। बर्हिः। आ। इदं। निऽयुवाना। निऽयुतः। स्पार्हऽ
वीराः। इंद्रवायूइति। सऽरथं। यातं। अर्वाक्। इदं। हि। वां। प्रऽभृतं। मध्वः। अग्रं। अध। प्री
णाना। वि। मुमुक्तं। अस्मेइति। याः। वां। शतं। निऽयुतः। याः। सहस्रं। इंद्रवायूइति। विश्वऽ
वाराः। सचंते। आ। आभिः। यातं। सुऽविदत्राभिः। अर्वाक्। पातं। नरा। प्रतिऽभृतस्य। म
ध्वः। ०। १३॥ ॥ आ। वायोइति। भूष। शुचिऽपाः। उप। नः। सहस्रं। ते। निऽयुतः। विश्वऽ
वार। उपोइति। ते। अंधः। मद्यं। अयामि। यस्य। देव। दधिषे। पूर्वऽपेयं। प्र। सोता। जी
रः। अध्वरेषु। अस्थात्। सोमं। इंद्राय। वायवे। पिबध्यै। प्र। यत्। वां। मध्वः। अग्रियं। भ
रंति। अध्वर्यवः। देवऽयंतः। शचीभिः। प्र। याभिः। यासि। दाश्वांसं। अच्छ। नियुत्ऽभिः।
वायोइति। इष्टये। दुरोणे। नि। नः। रयिं। सुऽभोजसं। युवस्व। नि। वीरं। गव्यं। अश्व्यं।
च। राधः। ये। वायवे। इंद्रऽमादनासः। आऽदेवासः। निऽतोशनासः। अर्यः। घ्नंतः। वृत्रा

प. पं. ६८
॥ ६१ ॥

भिः। सूरिऽभिः। स्याम। ससह्वांसः। युधा। नृऽभिः। अमित्रान्। १०। वायो इति। अस्मिन्।
सवने। मादयस्व। ११॥ १५ ॥ ॥ शुचिं। नु। स्तोमं। नवऽजातं। अद्य। इंद्राग्नी इति। वृत्रऽहे
ना। जुषेथां। उभा। हि। वां। सुऽहवा। जोहवीमि। ता। वाजं। सद्यः। उशते। धेष्ठा। ता। सा
नसी इति। शवसाना। हि। भूतं। साकंऽवृधा। शवसा। शूशुऽवांसा। क्षयंतौ। रायः। यवस
स्य। भूरेः। पृंक्तं। वाजस्य। स्थविरस्य। घृष्वेः। उपो इति। ह। यत्। विदथं। वाजिनः। गुः। धी
भिः। विप्राः। प्रऽमतिं। इच्छमानाः। अर्वंतः। न। काष्ठां। नक्षमाणाः। इंद्राग्नी इति। जोहु
वतः। नरः। ते। गीःऽभिः। विप्राः। प्रऽमतिं। इच्छमानाः। ईट्टे। रयिं। यशसं। पूर्वऽभाजं। इंद्रा
ग्नी इति। वृत्रऽहना। सुऽवज्रा। प्र। नः। नव्येभिः। तिरतं। देष्णैः। सं। यत्। मही इति। मिथती
इति। स्पर्धमाने इति। तनूऽरुचा। शूरऽसाता। यतैते इति। अदेवऽयुं। विदथे। देवयुऽभिः। ॥ ६१ ॥
सत्रा। हतं। सोमऽसुता। जनेन॥ १५ ॥ ॥ इमां। ऊं इति। सु। सोमऽसुतिं। उप। नः। आ। इंद्रा

राम

ग्नीइति। सौमनसाय। यातं। नु। चित्। हि। परिमम्नाथेइतिपरिऽमम्नाथे। अस्मान्। आ
। वां। शश्वत्ऽभिः। ववृतीय। वाजैः। सः। अग्ने। एना। नमसा। संऽइद्धः। अच्छ। मित्रं। वरु
णं। इंद्रं। वोचेः। ०। मृळ। तत्। अर्यमा। अदितिः। शिश्रथंतु। एताः। अग्ने। आशुषाणासः
। इष्टीः। युवोः। सचा। अभि। अश्याम। वाजान्। मा। इंद्रः। नः। विष्णुः। मरुतः। परि। ख्यन्।
०॥ १६ ॥ ॥ इयं। वां। अस्य। मन्मनः। इंद्राग्नीइति। पूर्व्यऽस्तुतिः। अभ्रात्। वृष्टिःऽइव।
अजनि। शृणुतं। जरितुः। हवं। इंद्राग्नीइति। वनतं। गिरः। ईशाना। पिप्यतं। धियः। मा।
पापऽत्वाय। नः। नरा। इंद्राग्नीइति। मा। अभिऽशस्तये। मा। नः। रीरधतं। निदे। इंद्रे। अ
ग्ना। नमः। बृहत्। सुऽवृक्तिं। आ। ईरयामहे। धिया। धेनाः। अवस्यवः। ता। हि। शश्वंतः।
। ईळते। इत्था। विप्रासः। ऊतये। सऽबाधः। वाजऽसातये। ता। वां। गीःऽभिः। विपन्यवः।
प्रयस्वंतः। हवामहे। मेधऽसाता। सनिष्यवः॥ १७ ॥ ॥ इंद्राग्नीइति। अवसा। आ। गतं।

१.पं.६
॥६२॥

अस्मभ्यं। चर्षणिऽसहा॥०। मा। कस्यै। नः।०। गोऽमत्। हिरण्यऽवत्। वसु। यत्। वां। अश्वऽ
वत्। ईमहे। इंद्राग्नीइति। तत्। वने महि। यत्। सोमे। आ। सुते। नरः। इंद्राग्नीइति। अजोहवुः
। सप्तिऽवंता। सपर्यवः। उक्थेभिः। वृत्रहनऽतमा। या। मंदाना। चित्। आ। गिरा। आंगूषैः।
आऽविवासतः। तो। इत्। दुःऽशंसं। मर्त्यं। दुःऽविद्वांसं। रक्षस्विनं। आऽभोगं। हन्मना। हतं।
उदऽधिं। हन्मना। हतं॥१८॥ ॥प्र। क्षोदसा। धायसा। सस्रे। एषा। सरस्वती। धरुणं। आयसी। पूः। प्रऽबाबधाना। रथ्याऽइव। याति। विश्वाः। अपः। महिना। सिंधुः। अन्याः। एका
। अचेतत्। सरस्वती। नदीनां। शुचिः। यती। गिरिऽभ्यः। आ। समुद्रात्। रायः। चेतंती। भुवनस्य
। भूरेः। घृतं। पयः। दुदुहे। नाहुषाय। सः। ववृधे। नर्यः। योषणासु। वृषा। शिशुः। वृषभः।
यज्ञियासु। सः। वाजिनं। मघवत्ऽभ्यः। दधाति। वि। सातये। तन्वं। ममृजीत। उत। स्या।
नः। सरस्वती। जुषाणा। उप। श्रवत्। सुऽभगा। यज्ञे। अस्मिन्। मितज्ञुऽभिः। नमस्यैः। इयाना

राम
॥६२॥

ना। राया। युजा। चित्। उत्ऽतरा। सखिऽभ्यः। इमा। जुह्वानाः। युष्मत्। आ। नमःऽभिः।
प्रति। स्तोमं। सरस्वति। जुषस्व। तव। शर्मन्। प्रियऽतमे। दधानाः। उप। स्थेयाम। शरणं। न।
वृक्षं। अयं। ऊं इति। ते। सरस्वति। वसिष्ठः। द्वारौ। ऋतस्य। सुऽभगे। वि। आवः। इत्यावः। व
र्ध। शुभ्रे। स्तुवते। रासि। वाजान्। ०॥१८॥ ॥ बृहत्। ऊं इति। गायिषे। वचः। असुर्या। न
दीनां। सरस्वतीं। इत्। महय। सुवृक्तिऽभिः। स्तोमैः। वसिष्ठ। रोदसी इति। उभे इति। यत्।
ते। महिना। शुभ्रे। अंधसी इति। अधि। क्षियंति। पूरवः। सा। नः। बोधि। अवित्री। मरुत्ऽस
खा। चोद। राधः। मघोनां। भद्रं। इत्। भद्रा। कृणवत्। सरस्वती। अकवऽअरी। चेतति। वाजि
नीऽवती। गृणाना। जमदग्निऽवत्। स्तुवाना। च। वसिष्ठऽवत्। जनिऽयंतः। नु। अग्रवः। पुत्रिऽ
यंतः। सुऽदानवः। सरस्वंतं। हवामहे। ये। ते। सरस्वः। ऊर्मयः। मधुऽमंतः। घृतऽश्चुतः। तेभिः।
नः। अविता। भव। पीपिऽवांसं। सरस्वतः। स्तनं। यः। विश्वऽदर्शतः। भक्षीमहि। प्रऽजां। इषं॥

प॰पं॰६
॥ ६२ ॥

॥२०॥ ॥यज्ञे।दिवः।नृऽसदने।पृथिव्याः।नरः।यत्र।देवऽयवः।मदंति।इंद्राय।यत्र।सव
नानि।सुन्वे।गमत्।मदाय।प्रथमं।वयः।च।आ।दैव्या।वृणीमहे।अवांसि।बृहस्पतिः।नः।
महे।आ।सखायः।यथा।भवेम।मीळ्हुषे।अनागाः।यः।नः।दाता।परा।ऽवतः।पिताऽइव।तं।
ऊं इति।ज्येष्ठं।नमसा।हविःऽभिः।सुऽशेवं।ब्रह्मणः।पतिं।गृणीषे।इंद्रं।श्लोकः।महि।
दैव्यः।सिषक्तु।यः।ब्रह्मणः।देवऽकृतस्य।राजा।सः।आ।नः।योनिं।सदतु।प्रेष्ठः।बृह
स्पतिः।विश्वऽवारः।यः।अस्ति।कामः।रायः।सुऽवीर्यस्य।तं।दात्।पर्षत्।नः।अति।सश्चतः।
अरिष्टान्।तं।आ।नः।अर्कं।अमृताय।जुष्टं।इमे।धासुः।अमृतासः।पुराऽजाः।शुचिऽक्रं
दं।यजतं।पस्त्यानां।बृहस्पतिं।अनर्वाणं।हुवेम॥२१॥ ॥तं।शग्मासः।अरुषासः।अ
श्वाः।बृहस्पतिं।सहऽवाहः।वहंति।सहः।चित्।यस्य।नीलऽवत्।सधऽस्थं।नभः।न।रू
पं।अरुषं।वसानाः।सः।हि।शुचिः।शतऽपत्रः।सः।शुंध्युः।हिरण्यऽवाशीः।इषिरः।स्वः

राम
॥ ६३ ॥

सा:। बृहस्पति:। स:। सुऽआवेश:। ऋष्व:। पुरु। सखिऽभ्य:। आऽसुतिं। करिष्ठ:। देवीइति।
देवस्य। रोदसीइति। जनित्रीइति। बृहस्पतिं। ववृधतु:। महिऽत्वा। दक्षाय्याय। दक्षत। सखा
य:। करत्। ब्रह्मणे। सुऽतरा। सुऽगाधा। इयं। वां। ब्रह्मण:। पते। सुऽवृक्ति:। ब्रह्म। इंद्राय। व
ज्रिणे। अकारि। बृहस्पते। युवं। इंद्र:। च। वस्व:। दिव्यस्य। ईशाथेइति। उत। पार्थिवस्य।
धत्तं। रयिं। स्तुवते। कीरये। चित्। ०॥ २२ ॥ ॥अध्वर्यव:। अरुणं। दुग्धं। अंशुं। जुहोतन। वृ
षभाय। क्षितीनां। गोरात्। वेदीयान्। अवऽपानं। इंद्र:। विश्वाह। इत्। याति। सुतऽसोमं।
इच्छन्। यत्। दधिषे। प्रऽदिवि। चारु। अन्नं। दिवेऽदिवे। पीतिं। इत्। अस्य। वक्षि। उत
। हृदा। उत। मनसा। जुषाण:। उशन्। इंद्र। प्रऽस्थितान्। पाहि। सोमान्। जज्ञान:। सोमं।
सहसे। पपाथ। प्र। ते। माता। महिमानं। उवाच। आ। इंद्र। पप्राथ। उरु। अंतरिक्षं। युधा।
देवेभ्य:। वरिव:। चकर्थ। यत्। योधया:। महत:। मन्यमानान्। साक्षाम। तान्। बाहुऽभि:

प॰पं॰६
॥६४॥

।शाशदानान्।यत्।वा।नः।भिः।वृतः।इंद्र।अभि।युध्याः।तं।त्वया।आजिं।सौश्रवसं।
जयेम।प्र।इंद्रस्य।वोचं।प्रथमा।कृतानि।प्र।नूतना।मघ।वा।या।चकार।यदा।इत्।अ
देवीः।असहिष्ट।मायाः।अथ।अभवत्।केवलः।सोमः।अस्य।तव।इदं।विश्वं।अभितः।
पशव्यं।यत्।पश्यसि।चक्षसा।सूर्यस्य।गवां।असि।गोऽपतिः।एकः।इंद्र।भक्षी महि
।ते।प्रऽयतस्य।वस्वः।०॥२३॥ ॥परः।मात्रया।तन्वा।वृधान।न।ते।महिऽत्वं।अनु।अ
श्नुवंति।उभेइति।ते।विद्म।रजसीइति।पृथिव्याः।विष्णोइति।देव।त्वं।परमस्य।वि
त्से।न।ते।विष्णोइति।जायमानः।न।जातः।देव।महिम्नः।परं।अंतं।आप।उत्।अ
स्तभ्नाः।नाकं।ऋष्वं।बृहंतं।दाधर्थ।प्राचीं।ककुभं।पृथिव्याः।इरावतीइतीराऽवती। राम
धेनुमतीइतिधेनुऽमती।हि।भूतं।सुयवसिनीइतिसुऽयवसिनी।मनुषे।दशस्या।वि। ॥६४॥
अस्तभ्नाः।रोदसीइति।विष्णोइति।एतेइति।दाधर्थ।पृथिवीं।अभितः।मयूखैः।उरु।

यज्ञाय। चक्रथुः। ऊँ इति। लोकं। जनयंता। सूर्यं। उषसं। आग्निं। दासस्य। चित्। वृषऽशिप्रस्य
। मायाः। जघ्नथुः। नरा। पृतनाज्येषु। इंद्रा विष्णू इति। दृंहिताः। शंबरस्य। नव। पुरः। नवतिं।
च। श्नथिष्टं। शतं। वर्चिनः। सहस्रं। च। साकं। हथः। अप्रति। असुरस्य। वीरान्। इयं। मनीषा।
बृहती। बृहंता। उरुऽक्रमा। तवसा। वर्धयंती। ररे। वां। स्तोमं। विदथेषु। विष्णो इति। पिन्वतं।
इषः। वृजनेषु। इंद्रा। वषट्। ते। विष्णो इति। आसः। आ। कृणोमि। तत्। मे। जुषस्व। शिपिऽ
विष्ट। हव्यं। वर्धंतु। त्वा। सुऽस्तुतयः। गिरः। मे।०॥ २४ ॥ ॥ नु। मर्त्तः। दयते। सनिष्यन्। यः।
विष्णवे। उरुऽगायाय। दाशत्। प्र। यः। सत्राचा। मनसा। यजाति। एतावंतं। नर्यं। आऽविवा
सात्। त्वं। विष्णो इति। सुऽमतिं। विश्वऽजन्यां। अप्रऽयुतां। एवऽयावः। मतिं। दाः। पर्चः। य
था। नः। सुवितस्य। भूरेः। अश्वऽवतः। पुरुऽचंद्रस्य। रायः। त्रिः। देवः। पृथिवीं। एषः। एतां।
वि। चक्रमे। शतऽअर्चसं। महिऽत्वा। प्र। विष्णुः। अस्तु। तवसः। तवीयान्। त्वेषं। हि। अस्य।

१.पं.६
॥६५॥

स्थविरस्य। नाम। वि। चक्रमे। पृथिवीं। एषः। एतां। क्षेत्राय। विष्णुः। मनुषे। दशस्यन्। ध्रुवासः
। अस्य। कीरयः। जनासः। उरुऽक्षितिं। सुऽजनिमा। चकार। प्र। तत्। ते। अद्य। शिपिऽविष्ट। ना
म। अर्यः। शंसामि। वयुनानि। विद्वान्। तं। त्वा। गृणामि। तवसं। अतव्यान्। क्षयंतं। अस्य।
रजसः। पराके। किं। इत्। ते। विष्णो इति। परिऽचक्ष्यं। भूत्। प्र। यत्। ववक्षे। शिपिऽविष्टः। अ
स्मि। मा। वर्पः। अस्मत्। अप। गूहः। एतत्। यत्। अन्यऽरूपः। संऽइथे। बभूथ। ०॥२५॥ ॥
॥ ॥इति पंचमाष्टके षष्ठोऽध्यायः॥ ॥ॐ॥ ॥तिस्रः। वाचः।
प्र। वद। ज्योतिःऽअग्राः। याः। एतत्। दुह्रे। मधुऽदोघं। ऊधः। सः। वत्सं। कृण्वन्। गर्भं। ओ
षधीनां। सद्यः। जातः। वृषभः। रोरवीति। यः। वर्धनः। ओषधीनां। यः। अपां। यः। विश्वस्य
। जगतः। देवः। ईशे। सः। त्रिऽधातु। शरणं। शर्म। यंसत्। त्रिऽवर्तु। ज्योतिः। सुऽअभिष्टि।
अस्मे इति। स्तरीः। ऊं इति। त्वत्। भवति। सूते। ऊं इति। त्वत्। यथाऽवशं। तन्वं। चक्रे। एः

राम
॥६५॥

ब:। पितु:। पय:। प्रति। गृभ्णाति। माता। तेन। पिता। वर्धते। तेन। पुत्र:। यस्मिन्। विश्वानि

। भुवनानि। तस्थु:। तिस्र:। द्याव:। त्रेधा। सस्रु:। आप:। त्रय:। कोशास:। उप॑ऽसेचनास:।

मध्व:। श्चोतंति। अभित:। विऽरप्शं। इदं। वच:। पर्जन्याय। स्वऽराजे। हृद:। अस्तु। अंतरं।

तत्। जुजोषत्। मय:ऽभुव:। वृष्टय:। संतु। अस्मे इति। सुऽपिप्पला:। ओषधी:। देवऽगोपा:

। स:। रेत:ऽधा:। वृषभ:। शश्वतीनां। तस्मिन्। आत्मा। जगत:। तस्थुष:। च। तत्। मा। ऋतं।

पातु। शतऽशारदाय। ० ॥ १ ॥ ॥ पर्जन्याय। प्र। गायत। दिव:। पुत्राय। मीळ्हुषे। स:। न:

यवसं। इच्छतु। य:। गर्भं। ओषधीनां। गवां। कृणोति। अर्वतां। पर्जन्य:। पुरुषीणां। तस्मै।

इत्। आस्ये। हवि:। जुहोत। मधुमत्ऽतमं। इळां। न:। संऽयतं। करत् ॥ २ ॥ ॥ संवत्सरं।

शशयाना:। ब्राह्मणा:। व्रतऽचारिण:। वाचं। पर्जन्यऽजिन्वितां। प्र। मंडूका:। अवादिषु:

। दिव्या:। आप:। अभि। यत्। एनं। आयन्। दृतिं। न। शुष्कं। सरसी इति। शयानं। गवां। अ

प॰ पं॰ ७

ह। न। मायुः। वत्सिनीनां। मंडूकानां। वग्नुः। अत्र। सं। एति। यत्। ईं। एनान्। उशतः।
अभि। अवर्षीत्। तृष्याऽवतः। प्रावृषि। आऽगतायां। अख्खलीकृत्य। पितरं। न। पुत्रः।
अन्यः। अन्यं। उप। वदंतं। एति। अन्यः। अन्यं। अनु। गृभ्णाति। एनोः। अपां। प्रऽसर्गे।
यत्। अमंदिषातां। मंडूकः। यत्। अभिऽवृष्टः। कनिस्कन्। पृश्निः। सं। पृंक्ते। हरितेन। वा
चं। यत्। एषां। अन्यः। अन्यस्य। वाचं। शाक्तस्यऽइव। वदति। शिक्षमाणः। सर्वं। तत्। ए
षां। समृधाऽइव। पर्व। यत्। सुऽवाचः। वदथन। अधि। अप्ऽसु॥ ३॥ ॥ गोऽमायुः। एकः।
अजऽमायुः। एकः। पृश्निः। एकः। हरितः। एकः। एषां। समानं। नाम। बिभ्रतः। विऽरूपाः।
पुरुऽत्रा। वाचं। पिपिशुः। वदंतः। ब्राह्मणासः। अतिऽरात्रे। न। सोमे। सरः। न। पूर्णं। अभि
तः। वदंतः। संवत्सरस्य। तत्। अहः। इति। परि। स्थ। यत्। मंडूकाः। प्रावृषीणं। बभूव। ब्रा
ह्मणासः। सोमिनः। वाचं। अक्रत। ब्रह्म। कृण्वंतः। परिवत्सरीणं। अध्वर्यवः। घर्मिणः। सि

राम

स्विदानाः। आविः। भवंति। गुह्याः। न। के। चित्। देवऽहितिं। जुगुपुः। द्वादशस्य। ऋतुं। नरः
। न। प्र। मिनंति। एते। संवत्सरे। प्रावृषि। आऽगतायां॥ तप्ताः। घर्माः। अश्नुवते। विऽसर्गं।
गोऽमायुः। अदात्। अजऽमायुः। अदात्। पृश्निः। अदात्। हरितः। नः। वसूनि। गवां। मंडूकाः
। ददतः। शतानि। सहस्रऽसावे। प्र। तिरंते। आयुः॥ ४ ॥ ॥ इंद्रासोमा। तपतं। रक्षः। उब्जतं
। नि। अर्पयतं। वृषणा। तमःऽवृधः। परा। शृणीतं। अचितः। नि। ओषतं। हतं। नुदेथां।
नि। शिशीतं। अत्रिणः। इंद्रासोमा। सं। अघऽशंसं। अभि। अघं। तपुः। ययस्तु। चरुः। अ
ग्निवान्ऽइव। ब्रह्मऽद्विषे। क्रव्यऽअदे। घोरऽचक्षसे। द्वेषः। धत्तं। अनवायं। किमीदिने।
इंद्रासोमा। दुःऽकृतः। वव्रे। अंतः। अनारंभणे। तमसि। प्र। विध्यतं। यथा। न। अतः। पुनः।
एकः। चन। उत्ऽअयत्। तत्। वां। अस्तु। सहसे। मन्युऽमत्। शवः। इंद्रासोमा। वर्तयतं। दिवः
। वधं। सं। पृथिव्याः। अघऽशंसाय। तर्हणं। उत्। तक्षतं। स्वर्यं। पर्वतेभ्यः। येन। रक्षः। वावृधा

नं।निऽजूर्वथः॥०॥परि।अग्निऽतप्तेभिः।युवं।अश्महन्मऽभिः।तपुःऽवधेभिः।अजरेभिः
।अत्रिणः।नि।पर्शाने।विध्यतं।यंतु।निऽस्वरं॥५॥ ॥इंद्रासोमा।परि।वां।भूतु।विश्वतः।
इयं।मतिः।कक्ष्या।अश्वाऽइव।वाजिना।यां।वां।होत्रां।परिऽहिनोमि।मेधया।इमा।ब्रह्मा
णि।नृपतीइवेतिनृपतीऽइव।जिन्वतं।प्रति।स्मरेथां।तुजयत्ऽभिः।एवैः।हतं।द्रुहः।रक्ष
सः।भंगुरऽवतः।इंद्रासोमा।दुःऽकृते।मा।सुऽगं।भूत्।यः।नः।कदा।चित्।अभिऽदास
ति।द्रुहा।यः।मा।पाकेन।मनसा।चरंतं।अभिऽचष्टे।अनृतेभिः।वचःऽभिः।आपःऽइ
व।काशिना।संऽगृभीताः।असन्।अस्तु।असतः।इंद्र।वक्ता।ये।पाकऽशंसं।विऽहरं
ते।एवैः।ये।वा।भद्रं।दूषयंति।स्वधाभिः।अहये।वा।तान्।प्रऽददातु।सोमः।आ।वा।द
धातु।निःऽऋतेः।उपऽस्थे।यः।नः।रसं।दिप्सति।पित्वः।अग्ने।यः।अश्वानां।यः।ग
वां।यः।तनूनां।रिपुः।स्तेनः।स्तेयऽकृत्।दभ्रं।एतु।नि।सः।हीयतां।तन्वा।तना।च॥

॥ ६ ॥ ॥ परः । सः । अस्तु । तन्वा । तना । च । तिस्रः । पृथिवीः । अधः । अस्तु । विश्वाः । प्रति ।
शुष्यतु । यशः । अस्य । देवाः । यः । नः । दिवा । दिप्सति । यः । च । नक्तं । सुऽविज्ञानं । चिकि
तुषे । जनाय । सत् । च । असत् । च । वचसी इति । पस्पृधाते इति । तयोः । यत् । सत्यं । यतरत् ।
ऋजीयः । तत् । इत् । सोमः । अवति । हंति । असत् । न । वै । ऊं इति । सोमः । वृजिनं । हिनो
ति । न । क्षत्रियं । मिथुया । धारयंतं । हंति । रक्षः । हंति । असत् । वदंतं । उभौ । इंद्रस्य । प्रऽ
सितौ । शयाते इति । यदि । वा । अहं । अनृतऽदेवः । आस । मोघं । वा । देवान् । अपिऽऊहे ।
अग्ने । किं । अस्मभ्यं । जातऽवेदः । हृणीषे । द्रोघऽवाचः । ते । निःऽऋथं । सचंतां । अद्य ।
मुरीय । यदि । यातुऽधानः । अस्मि । यदि । वा । आयुः । ततप । पुरुषस्य । अध । सः । वी
रैः । दशऽभिः । वि । यूयाः । यः । मा । मोघं । यातुऽधान । इति । आह ॥ ७ ॥ ॥ यः । मा । अ
यातुं । यातुऽधान । इति । आह । यः । वा । रक्षाः । शुचिः । अस्मि । इति । आह । इंद्रः । तं । हंतु ।

प॰ पं॰ ७
॥ ६९ ॥

महता। वधेन। विश्वस्य। जंतोः। अधमः। पदीष्ट। प्र। या। जिगाति। खर्गला ऽ इव। नक्तं। अप। द्रुहा। तन्वं। गूहमाना। वव्रान्। अनंतान्। अव। सा। पदीष्ट। ग्रावाणः। घ्नंतु। रक्षसः। उपब्दैः। वि। तिष्ठध्वं। मरुतः। विक्षु। इच्छत। गृभायत। रक्षसः। सं। पिनष्टन। वयः। ये। भूत्वी। पतयंति। नक्तऽभिः। ये। वा। रिपः। दधिरे। देवे। अध्वरे। प्र। वर्त्तय। दिवः। अश्मानं। इंद्र। सोमऽशितं। मघऽवन्। सं। शिशाधि। प्राक्तात्। अपाक्तात्। अधरात्। उदक्तात्। अभि। जहि। रक्षसः। ... पर्वतेन। एते। ऊं इति। त्ये। पतयंति। श्वऽयातवः। इंद्रं। दिप्संति। दिप्सवः। अदाभ्यं। शिशीते। शक्रः। पिशुनेभ्यः। वधं। नूनं। सृजत्। अशनिं। यातुमत्ऽभ्यः॥ १८ ॥ ॥ इंद्रः। यातूनां। अभवत्। पराऽशरः। हविःऽमथीनां। अभि। आऽविवासतां। अभि। इत्। ऊं इति। शक्रः। परशुः। यथा। वनं। पात्रा ऽ इव। भिंदन्। सतः। एति। रक्षसः। उलूकऽयातुं। शुशुलूकऽयातुं। जहि। श्वऽयातुं। उत। कोकऽ

राम
६९

यातुं। सुपर्णऽयातुं। उत। गृध्रऽयातुं। दृषदाऽइव। प्र। मृण। रक्षः। इंद्र। मा। नः। रक्षः। अ
भि। नट्। यातुऽमावतां। अप। उच्छतु। मिथुना। या। किमीदिना। पृथिवी। नः। पार्थिवात्।
पातु। अंहसः। अंतरिक्षं। दिव्यात्। पातु। अस्मान्। इंद्र। जहि। पुमांसं। यातुऽयानं। उत।
स्त्रियं। मायया। शाशदानां। विऽग्रीवासः। मूरऽदेवाः। ऋदंतु। मा। ते। दृशन्। सूर्यं। उत्ऽ
चरंतं। प्रति। चक्ष्व। वि। चक्ष्व। इंद्रः। च। सोम। जागृतं। रक्षःऽभ्यः। वधं। अस्यतं। अश
निं। यातुमत्ऽभ्यः॥ २॥ ॥इतिमंडलं॥ ॥मा। चित्। अन्यत्। वि। शंसत। सखायः।
मा। रिषण्यत। इंद्रं। इत्। स्तोत। वृषणं। सचा। सुते। मुहुः। उक्था। च। शंसत। अवऽक्र
क्षिणं। वृषभं। यथा। अजुरं। गां। न। चर्षणिऽसहं। विऽद्वेषणं। संऽवननां। उभयंऽकरं।
मंहिष्ठं। उभयाविनं। यत्। चित्। हि। त्वा। जनाः। इमे। नाना। हवंते। ऊतये। अस्माकं। ब्रह्म।
इदं। इंद्र। भूतु। ते। अहा। विश्वा। च। वर्धनं। वि। तत्तूर्यते। मघऽवन्। विपःऽचितः। अर्यः।

प॰ पं॰ ८
॥ ६८ ॥

विपः। जनानां। उप। क्रमस्व। पुरुऽरूपं। आ। भर। वाजं। नेदिष्ठं। ऊतये। महे। चन। त्वां।
अद्रिऽवः। परा। शुल्काय। देयां। न। सहस्राय। न। अयुताय। वज्रिऽवः। न। शताय। शतऽ
मघ॥ १०॥ ॥ वस्यान्। इंद्र। असि। मे। पितुः। उत। भ्रातुः। अभुंजतः। माता। च। मे। छ
दयथः। समा। वसो इति। वसुऽत्वनाय। राधसे॥ क्व। इयथ। क्व। इत्। असि। पुरुऽत्रा। चित्
। हि। ते। मनः। अलर्षि। युध्म। खजऽकृत्। पुरंऽदर। प्र। गायत्राः। अगासिषुः। प्र। अस्मै। गा
यत्रं। अर्चत। ववातुः। यः। पुरंऽदरः। याभिः। काण्वस्य। उप। बर्हिः। आऽसदं। यासत्। व
ज्री। भिनत्। पुरः। ये। ते। संति। दशऽग्विनः। शतिनः। ये। सहस्रिणः। अश्वासः। ये। ते। वृ
षणः। रघुऽद्रुवः। तेभिः। नः। तूयं। आ। गहि। आ। तु। अद्य। सबःऽदुघां। हुवे। गायत्रऽ
वेपसं। इंद्रं। धेनुं। सुऽदुघां। अन्यां। इषं। उरुऽधारां। अरंऽकृतं॥ ११॥ ॥ यत्। तुदत्। सू
रः। एतशं। वंकू इति। वातस्य। पर्णिना। वहत्। कुत्सं। आर्जुनेयं। शतऽक्रतुः। त्सरत्। गंध

राम
॥ ६८ ॥

वें। अस्तृतं। यः। ऋते। चित्। अभिऽश्रिषः। पुरा। जत्रुऽभ्यः। आऽतृदः॥ संऽधाता। संऽधिं
। मघऽवा। पुरुऽवसुः। इष्कर्ता। विऽह्रुतं। पुनरिति॥ मा। भूम। निष्ट्याःऽइव। इंद्र। त्वत्। अ
रणाःऽइव। वनानि। न। प्रऽजहितानि। अद्रिऽवः। दुरोषासः। अमन्महि। अमन्महि।
इत। अनाशवः। अनुग्रासः। च। वृत्रऽहन्। सकृत्। सु। ते। महता। शूर। राधसा। अनु। स्तो
मं। मुदीमहि। यदि। स्तोमं। मम। श्रवत्। अस्माकं। इंद्रं। इंदवः। तिरः। पवित्रं। ससृऽवांसः। आशवः। मंदंतु। तुग्र्यऽवृधः॥ १२॥ ॥ ०॥ सधऽस्तुतिं। ववातुः। सख्युः। आ। गहि। उपऽस्तु
तिः। मघोनां। प्र। त्वा। अवतु। अध। ते। वश्मि। सुऽस्तुतिं। सोत। हि। सोमं। अद्रिऽभिः। आ।
ईं। एनं। अप्ऽसु। धावत। गव्या। वस्त्राऽइव। वासयंतः। इत्। नरः। निः। धुक्षन्। वक्षणाभ्यः
। अध। ज्मः। अध। वा। दिवः। बृहतः। रोचनात्। अधि। अया। वर्धस्व। तन्वा। गिरा। मम।
आ। जाता। सुक्रत्वोइतिसुऽक्रतो। पृण॥ इंद्राय। सु। मदिन्ऽतमं। सोमं। सोत। वरेण्यं। शक्रः।

प॰ पं॰ ८ ॥७०॥

एनं। पीपयत। विश्वया। धिया। हिन्वानं। न। वाजऽयुं। मा। त्वा। सोमस्य। गल्दया। सदा।
याचन्न्। अहं। गिरा। भूर्णिं। मृगं। न। सवनेषु। चुक्रुधं। कः। ईशानं। न। याचिषत्॥ १३॥
॥ ॥मदेन। इषितं। मदं। उग्रं। उग्रेण। शवसा। विश्वेषां। तरुतारं। मदऽच्युतं। मदे। हि।
स्म। ददाति। नः। शेवृधे। वार्या। पुरु। देवः। मर्त्ताय। दाशुषे। सः। सुन्वते। च। स्तुवते। च।
रासते। विश्वऽगूर्त्तः। अरिऽस्तुतः। आ। इंद्र। याहि। मत्स्व। चित्रेण। देव। राधसा। सरः।
न। प्रासि। उदरं। सपीतिऽभिः। आ। सोमेभिः। उरु। स्फिरं। आ। त्वा। सहस्रं। आ। शतं।
युक्ताः। रथे। हिरण्यये। ब्रह्मऽयुजः। हरयः। इंद्र। केशिनः। वहंतु। सोमऽपीतये। आ।
त्वा। रथे। हिरण्यये। हरीइति। मयूरऽशेप्या। शितिऽपृष्ठा। वहतां। मध्वः। अंधसः।
विवक्षणस्य। पीतये॥ १४॥ ॥ ॥पिब। तु। अस्य। गिर्वणः। सुतस्य। पूर्वपाःऽइव। प
रिऽकृतस्य। रसिनः। इयं। आऽसुतिः। चारुः। मदाय। पत्यते। यः। एकः। अस्ति। दंसना॥

राम ॥७०॥

महान्। उग्रः। अभि। व्रतैः। गमत्। सः। शिप्री। न। सः। योषत्। आ। गमत्। हवं। न। प
रि। वर्जति। त्वं। पुरं। चरिष्ण्वं। वधैः। शुष्णस्य। सं। पिणक्। त्वं। भाः। अनु। चरः। अध। द्वि
ता। यत्। इंद्र। हव्यः। भुवः। मम। त्वा। सूरे। उत्ऽइते। मम। मध्यंदिने। दिवः। मम। प्रऽ
पित्वे। अपिऽशर्वरे। वसो इति। आ। स्तोमासः। अवृत्सत। स्तुहि। स्तुहि। इत्। एते। घ। ते।
मंहिष्ठासः। मघोनां। निंदितऽअश्वः। प्रऽपथी। परमऽज्याः। मघस्य। मेध्यऽअतिथे।
॥१५॥ ॥आ। यत्। अश्वान्। वनन्ऽवतः। श्रद्धया। अहं। रथे। रुहं। उत। वामस्य। वसु
नः। चिकेतति। यः। अस्ति। याद्वः। पशुः। यः। ऋज्राः। मह्यं। ममहे। सह। त्वचा। हिरण्य
या। एषः। विश्वानि। अभि। अस्तु। सौभगा। आऽसंगस्य। स्वनत्ऽरथः। अध। प्ला
योगिः। अति। दासत्। अन्यान्। आऽसंगः। अग्ने। दशऽभिः। सहस्रैः। अध। उक्षणः
। दश। मह्यं। रुशंतः। नळाःऽइव। सरसः। निः। अतिष्ठन्। अनु। अस्य। स्थूरं। ददृशे।

प॰ पं॰ ७
॥७१॥

पुरस्तात्।अनस्थः।ऊरू।अव॑ऽरंबमाणः।शश्वती।नारी।अभिऽचक्ष्य।आह।सुऽ
भद्रं।अर्य।भोजनं।बिभर्षि॥१६॥ ॥इदं।वसो इति।सुतं।अंधः।पिब।सुऽपूर्णं।उ
दरं।अनाभयिन्।ररिम।ते॥न्ऽभिः।धूतः।सुतः।अश्नैः।अव्यः।वारैः।परिऽपूतः।अ
श्वः।न।निक्तः।नदीषु।तं।ते।यवं।यथा।गोभिः।स्वादुं।अकर्म।श्रीणंतः।इंद्र।त्वा।अ
स्मिन्।सधऽमादे॥इंद्रः।इत्।सोमऽपाः।एकः।इंद्रः।सुतऽपाः।विश्वऽआयुः।अंतः।दे
वान्।मर्त्यान्।च।न।यं।शुक्रः।न।दुःऽआशीः।न।तृप्राः।उरुऽव्यचसं।अपऽस्पृण्व
ते।सुऽहार्दं॥१७॥ ॥गोभिः।यत्।ईं।अन्ये।अस्मत्।मृगं।न।व्राः।मृगयंते।अभिऽ
त्सरंति।धेनुऽभिः।त्रयः।इंद्रस्य।सोमाः।सुतासः।संतु।देवस्य।स्वे।क्षये।सुतऽपाव्नः।
त्रयः।कोशासः।श्चोतंति।तिस्रः।चम्वः।सुऽपूर्णाः।समाने।अधि।भार्मन्।शुचिः।अ
सि।पुरुनिःऽस्थाः।क्षीरैः।मध्यतः।आऽशीर्त्तः।दध्ना।मंदिष्ठः।शूरस्य।इमे।ते।इंद्र।

राम
॥७१॥

सोमाः। तीव्राः। अस्मेइति। सुतासः। शुक्राः। आऽशिरं। यावंते॥ १८॥ ॥तान्। आऽ
शिरं। पुरोळाशं। इंद्र। इमं। सोमं। श्रीणीहि। रेवंतं। हि। त्वा। शृणोमि। हृत्सु। पीता
सः। युध्यंते। दुःऽमदासः। न। सुरायां। ऊधः। न। नग्नाः। जरंते। रेवान्। इत्। रेवतः। स्तोता।
स्यात्। त्वाऽवतः। मघोनः। प्र। इत्। ऊंइति। हरिऽवः। श्रुतस्य। उक्थं। चन। शस्यमानं।
अगोः। अरिः। आ। चिकेत। न। गायत्रं। गीयमानं। मा। नः। इंद्र। पीयत्नवे। मा। शर्धते।
परा। दाः। शिक्ष। शचीऽवः। शचीभिः॥ १९॥ ॥ तत्। इत्। ऽअर्थाः। इंद्र। त्वाऽयंतः। सखा
यः। कण्वाः। उक्थेभिः। जरंते। न। घ। ईं। अन्यत्। आ। पपन। वज्रिन्। अपसः। नविष्टौ
तव। इत्। ऊंइति। स्तोमं। चिकेत। इच्छंति। देवाः। सुन्वंतं। न। स्वप्नाय। स्पृहयंति। यं
ति। प्रऽमादं। अतंद्राः। ओइति। सु। प्र। याहि। वाजेभिः। मा। हृणीथाः। अभि। अस्मान्।
महान्ऽइव। युवऽजानिः। मोइति। सु। अद्य। दुःऽहनावान्। सायं। करत्। आरे। अस्मत्।

प॰पं॰७
॥७२॥

अश्रीरःऽइव।जामाता॥२०॥ ॥विद्म।हि।अस्य।वीरस्य।भूरिऽदावरीं।सुऽमतिं।त्रि
षु।जातस्य।मनांसि।आ।तु।सिंच।कण्वऽमंत।न।घ।विद्म।शवसानात्।यशःऽतरं।श
तंऽऊतेः।ज्येष्ठेन।सोतः।इंद्राय।सोमं।वीराय।शक्राय।भर।पिबत्।नर्याय।यः।वेदिष्ठः
।अव्यथिषु।अश्वऽवंतं।जरितृऽभ्यः।वाजं।स्तोतृऽभ्यः।गोऽमंतं।पन्यंऽपन्यं।इत्।सो
तारः।आ।धावत।मद्याय।सोमं।वीराय।शूराय॥२१॥ ॥पाता।वृत्रऽहा।सुतं।आ।
घ।गमत्।न।आरे।अस्मत्।नि।यमते।शतंऽऊतिः।आ।इह।हरीइति।ब्रह्मऽयुजा।
शग्मा।वक्षतः।सखायं।गीःऽभिः।श्रुतं।गिर्वणसं।स्वादुःस्वः।सोमाः।आ।याहि।श्री
ताः।सोमाः।आ।याहि।शिप्रिन्।ऋषिऽवः।शचीऽवः।न।अयं।अच्छ।सधऽमादं।स्तुतः
।त्वायाः।त्वा।वर्धंति।महे।राधसे।नृम्णाय।इंद्र।कारिणं।वृधंतः।गिरः।त्वायाः।ते।गि
र्वाहः।उक्था।च।तुभ्यं।तानि।सत्रा।दधिरे।शवांसि॥२२॥ ॥एव।इत्।एषः।तुविऽ

राम
॥७२॥

कूर्मिः । वाजान् । एकः । वज्रऽहस्तः । सनात् । अमृक्तः । दयते । हंता । वृत्रं । दक्षिणे
न । इंद्रः । पुरुऽपुरुऽहूतः । महान् । महीभिः । शचीभिः । यस्मिन् । विश्वाः । चर्षणयः ।
उत । च्यौत्ना । ज्रयांसि । च । अनु । घ । इत् । मंदी । मघोनः । एषः । एतानि । चकार ।
इंद्रः । विश्वा । यः । अति । शृण्वे । वाजऽदावा । मघोनां । प्रऽभर्त्ता । रथे । गव्यंतं । अपा
कात् । चित् । यं । अवति । इनः । वसु । सः । हि । वोळ्हा ॥ २३ ॥ ॥ सनिता । विप्रः । अ
र्वत्ऽभिः । हंता । वृत्रं । नृऽभिः । शूरः । सत्यः । अविता । विधंतं । यजध्व । एनं । प्रियऽ
मेधाः । इंद्रं । सत्राचा । मनसा । यः । भूत् । सोमैः । सत्यऽमद्वा । गाथऽश्रवसं । सत्ऽ
पतिं । श्रवःऽकामं । पुरुऽत्मानं । कण्वासः । गात । वाजिनं । यः । ऋते । चित् । गाः । प
देभ्यः । दात् । सखा । नृऽभ्यः । शचीऽवान् । ये । अस्मिन् । कामं । आऽश्रियन् । इत्था ।
धीऽवंतं । अद्रिऽवः । काण्वं । मेध्यऽअतिथिं । मेषः । भूतः । अभि । यन् । अयः । शि

प॰ पं॰ ८
॥ ८३ ॥

क्ष । विभिंदोइतिवि ऽ भिंदो । अस्मै । चत्वारि । अयुता । ददत् । अष्ट । परः । सहस्रा । उत । सु
त्येइति । पयः ऽ वृधा ॥ माकीइति । रणस्य । नप्त्या । जनि ऽ त्वनाय । ममहे ॥ २४ ॥ ॥ दिव
सुतस्य । रसिनः । मत्स्व । नः । इंद्र । गो ऽ मतः । आपिः । नः । बोधि । सध ऽ माद्यः । वृधे । अ
स्मान् । अवंतु । ते । धियः । भूयाम । ते । सु ऽ मतौ । वाजिनः । वयं । मा । नः । स्तः । अभि ऽ
मातये । अस्मान् । चित्राभिः । अवतात् । अभिष्टि ऽ भिः । आ । नः । सुम्नेषु । यमय ॥ इमाः । ऊं
इति । त्वा । पुरुवसोइतिपुरु ऽ वसो । गिरः । वर्धंतु । याः । मम । पावक ऽ वर्णाः । शुचयः । वि
पः ऽ चितः । अभि । स्तोमैः । अनूषत ॥ अयं । सहस्रं । ऋषि ऽ भिः । सहः ऽ कृतः । समुद्रः ऽ इ
व । पप्रथे । सत्यः । सः । अस्य । महिमा । गृणे । शवः । यज्ञेषु । विप्र ऽ राज्ये ॥ इंद्रं । इत् । देव ऽ
तातये । इंद्रं । प्र ऽ यति । अध्वरे । इंद्रं । सं ऽ ईके । वनिनः । हवामहे । इंद्रं । धनस्य । सातये ॥
॥ २५ ॥ ॥ इंद्रः । मह्ना । रोदसीइति । पप्रथत् । शवः । इंद्रः । सूर्यं । अरोचयत् । इंद्रे । ह । वि

राम
॥ ८३ ॥

श्वा। भुवनानि। येमिरे। इंद्रे। सुवानासः। इंदवः।०। इंद्रं। स्तोमेभिः। आयवः। संऽईचीना
सः। ऋभवः। सं। अस्वरन्। रुद्राः। गृणंत। पूर्व्यं। अस्य। इत्। इंद्रः। ववृधे। वृष्ण्यं। शवः।
मदे। सुतस्य। विष्णवि। अद्य। तं। अस्य। महिमानं। आयवः। अनु। स्तुवंति। पूर्वऽथा। तत्।
त्वा। यामि। सुऽवीर्यं। तत्। ब्रह्म। पूर्वऽचित्तये। येन। यतिऽभ्यः। भृगवे। धने। हिते। येन।
प्रस्कण्वं। आविथ। येन। समुद्रं। असृजः। महीः। अपः। तत्। इंद्र। वृष्णि। ते। शवः। सद्यः।
सः। अस्य। महिमा। न। संऽनशे। यं। क्षोणीः। अनुऽचक्रदे॥ २६॥ ॥ शग्धि। नः। इंद्र।
यत्। त्वा। रयिं। यामि। सुऽवीर्यं। शग्धि। वाजाय। प्रथमं। सिसासते। शग्धि। स्तोमा
य। पूर्व्य। शग्धि। नः। अस्य। यत्। ह। पौरं। आविथ। धियः। इंद्र। सिसासतः। शग्धि। य
था। रुशमं। श्यावकं। कृपं। इंद्र। प्र। आवः। स्वःऽनरं। कत्। नव्यः। अतसीनां। तुरः। गृणी
त। मर्त्यः। नहि। नु। अस्य। महिमानं। इंद्रियं। स्वः। गृणंतः। आनशुः। कत्। ऊं इति। स्तुवंतः।

१·पं·८

॥२४॥

ऋत ऽ यंत। देवता॥ ऋषिः। कः। विप्रः। ओहते। कदा। हवं। मघ ऽ वन्। इंद्र। सुन्वतः। कृ
त। ऊंइति। स्तुवतः। आ। गमः। उत। ऊंइति। त्ये। मधुमत् ऽ तमाः। गिरः। स्तोमासः। ईर
ते। सत्रा ऽ जितः। धन ऽ साः। अक्षित ऽ ऊतयः। वाजऽ यंतः। रथाः ऽ इव॥ २८॥ ॥कण्वाः ऽ
इव। भृगवः। सूर्याः ऽ इव। विश्वं। इत्। धीतं। आनशुः। इंद्रं। स्तोमेभिः। महयंतः। आ
यवः। प्रियऽ मेधासः। अस्वरन्। युक्ष्व। हि। वृत्रहन् ऽ तम। हरीइति। इंद्र। परा ऽ वतः।
अर्वाचीनः। मघ ऽ वन्। सोम ऽ पीतये। उग्रः। ऋष्वेभिः। आ। गहि। इमे। हि। ते। कारवः
। वावशुः। धिया। विप्रासः। मेध ऽ सातये। सः। त्वं। नः। मघ ऽ वन्। इंद्र। गिर्वणाः।
वेनः। न। शृणुधि। हवं। निः। इंद्र। बृहतीभ्यः। वृत्रं। धनुऽभ्यः। अस्फुरः। निः। अ
र्बुदस्य। मृगयस्य। मायिनः। निः। पर्वतस्य। गाः। आजः। निः। अग्नयः। रुरुचुः। निः
। ऊंइति। सूर्यः। निः। सोमः। इंद्रियः। रसः। निः। अंतरिक्षात्। अधमः। महां। अहिं। कृ

राम

॥२४॥

षे।तत्।इंद्र।पौंस्यं॥२८॥ ॥यं।मे।दुः।इंद्रः।मरुतः।पाकऽस्थामा।कौरयाणः।वि
श्वेषां।त्मना।शोभिष्ठं।उपऽइव।दिवि।धावमानं।रोहितं।मे।पाकऽस्थामा।सुऽधुरं।क
क्ष्यऽप्रां।अदात्।रायः।विऽबोधनं।यस्मै।अन्ये।दश।प्रति।धुरं।वहंति।वह्नयः।अस्तं।
वयः।न।तुग्र्यं।आत्मा।पितुः।तनूः।वासः।ओजःऽदाः।अभिऽअंजनं।तुरीयं।इत्।रो
हितस्य।पाकऽस्थामानं।भोजं।दातारं।अब्रवं॥२९॥ ॥यत्।इंद्र।प्राक्।अपाक्।उ
दक्।न्यक्।वा।हूयसे।नृऽभिः।सिम।पुरु।नृऽसूतः।असि।आनवे।असि।प्रऽशर्ध।तु
र्वशे।यत्।वा।रुमे।रुशमे।श्यावके।कृपे।इंद्र।मादयसे।सचा।कण्वासः।त्वा।ब्रह्मऽ
भिः।स्तोमऽवाहसः।इंद्र।आ।यच्छंति।आ।गहि।यथा।गौरः।अपा।कृतं।तृष्यन्।एति
अव।इरिणं।आऽपित्वे।नः।प्रऽपित्वे।तूयं।आ।गहि।कण्वेषु।सु।सचा।पिब।मंदंतु।
त्वा।मघऽवन्।इंद्र।इंदवः।राधःऽदेयाय।सुन्वते।आऽमुष्य।सोमं।अपिबः।चमू इति।

प॰ दं॰ ८

॥ ७५ ॥

सुतं। त्ये ष्ठं। तत्। दधिषे। सहः। प्र। चक्रे। सहसा। सहः। बृष्मंज। मन्युं। ओजसा। वि

श्वे। ते। इंद्र। पृतना। यवः। यहोइति। नि। वृक्षाः। इव। येमिरे॥ ३०॥ ॥सहस्रेण। इव।

सचते। यविऽयुधा। यः। ते। आनट्। उपऽस्तुतिं। पुत्रं। प्रावर्गं। कृणुते। सुऽवीर्यें। दा

श्नोति। नमउक्तिऽभिः। मा। भेम। मा। श्रमिष्म। उग्रस्य। सख्ये। तव। महत्। ते। वृष्णः।

अभिऽचक्ष्यं। कृतं। पश्येम। तुर्वशं। यदुं। सव्यां। अनु। स्फिग्यं। ववसे। वृषा। न। दानः।

अस्य। रेषति। मध्वा। संऽपृक्ताः। सारघेण। धेनवः। तूयं। आ। इहि। द्रव। पिब। अश्वी

रयी। सुऽरूपः। इत्। गोऽमान्। इत्। इंद्र। ते। सखा। श्वात्रऽभाजा। वयसा। सचते। सदा।

चंद्रः। याति। सभां। उप। ऋश्यः। न। तृष्यन्। अवऽपानं। आ। गहि। पिब। सोमं। वशा

न्। अनु। निऽमेघमानः। मघऽवन्। दिवेऽदिवे। ओजिष्ठं। दधिषे। सहः॥ ३१॥ ॥अ

ध्वर्योइति। द्रवय। त्वं। सोमं। इंद्रः। पिपासति। उप। नूनं। युयुजे। वृषणा। हरीइति। आ।

राम

॥ ७५ ॥

व। जगाम। वृत्रऽहा। स्वयं। चित्। सः। मन्यते। दाशुरिः। जनः। यत्र। सोमस्य। तृंपसि।
इदं। ते। अन्नं। युज्यं। संऽउक्षितं। तस्य। आ। इहि। प्र। द्रव। पिब। रथेऽस्थाय। अध्वर्य
वः। सोमं। इंद्राय। सोतन। अधि। ब्रध्नस्य। अद्रयः। वि। चक्षते। सुन्वंतः। दाशुऽअध्व
रं। उप। ब्रध्नं। ववाता। वृषणा। हरीइति। इंद्र। अपऽसु। वक्षतः। अर्वाचं। त्वा। ०। प्र। पू
षणं। वृणीमहे। युज्याय। पुरुऽवसुं। सः। शक्र। शिक्ष। पुरुऽहूत। नः। धिया। तुजे।
राये। विऽमोचन॥ ३२॥ ॥सं। नः। शिशीहि। भुरिजोःऽइव। क्षुरं। रास्व। रायः। विऽ
मोचन। त्वेइति। तत्। नः। सुऽवेदं। उस्त्रियं। वसु। यं। त्वं। हिनोषि। मर्त्यं। वेमि। त्वा।
पूषन्। ऋंजसे। वेमि। स्तोतवे। आघृणे। न। तस्य। वेमि। अरणं। हि। तत्। वसोइति
। स्तुषे। पज्राय। साम्ने। परा। गावः। यवसं। कत्। चित्। आघृणे। नित्यं। रेक्णः। अ
मर्त्य। अस्माकं। पूषन्। अविता। शिवः। भव। मंहिष्ठः। वाजऽसातये। स्थूरं। राधः।

प॰ पं॰ ८
॥ ७६॥

शतऽअश्व्यं। कुरुंगस्य। दिविष्टिषु। राज्ञः। त्वेषस्य। सुऽभगस्य। रातिषु। तुर्वशेषु। अ
मन्महि। धीभिः। सातानि। काण्वस्य। वाजिनः। प्रियऽमेधैः। अभिद्युऽभिः। षष्टिं।
सहस्रा। अनु। निःऽमजां। अजे। निः। यूथानि। गवां। ऋषिः। वृक्षाः। चित। मे। अभि।
पित्वे। अरणुः। गां। भजंत। मेहना। अश्व्यं। भजंत। मेहना॥ ३२॥ ॥ इति
पंचमाष्टके सप्तमोऽध्यायः॥ ॥ ॐ॥ ॥ दूरात्। इहऽइव। यत्। सती। अ
रुणऽप्सुः। अशिश्वितत्। वि। भानुं। विश्वधा। अतनेत्। नृऽवत्। दस्रा। मनःऽ
युजा। रथेन। पृथुऽपाजसा। सचेथे इति। अश्विना। उषसं। युवाभ्यां। वाजिनी
वसू इति वाजिनीऽवसू। प्रति। स्तोमाः। अदृक्षत। वाचं। दूतः। यथा। ओहिषे। राम
पुरुऽप्रिया। नः। ऊतये। पुरुऽमंद्रा। पुरुवसू इति पुरुऽवसू। स्तुषे। कण्वासः। ॥ ७६॥
। अश्विना। मंहिष्ठा। वाजऽसातमा। इषयंता। शुभः। पती इति। गंतारा। दाशु

षः। गृहं॥ १ ॥ ॥ ता। सु। देवाय। दाशुषे। सुऽमेधां। अविऽतारिणीं। घृतैः। गव्यू
तिं। उक्षतं। आ। नः। स्तोमं। उप। द्रवत्। तूयं। श्येनेभिः। आशुऽभिः। यातं। अश्वै
भिः। अश्विना। येभिः। तिस्रः। पराऽवतः। दिवः। विश्वानि। रोचना। त्रीन्। अ
क्तून्। परिऽदीयथः। उत। नः। गोऽमतीः। इषः। उत। सातीः। अहःऽविदा। वि
पथः। सातये। सितं। आ। नः। गोऽमंतं। अश्विना। सुऽवीरं। सुऽरथं। रयिं। वो
ढं। अश्वऽवतीः। इषः॥ २ ॥ ॥ ववृधाना। शुभः। पती इति। दस्रा। हिरण्यवर्त्त
नी इति हिरण्यऽवर्त्तनी। पिबतं। सोम्यं। मधु। अस्मभ्यं। वाजिनीवसू इति वाजि
नीऽवसू। मघवत्ऽभ्यः। च। सऽप्रथः। छर्दिः। यंतं। अदाभ्यं। नि। सु। ब्रह्म। ज
नानां। या। अविष्टं। तूयं। आ। गतं। मो इति। सु। अन्यान्। उप। अरतं। अस्य। पि
बतं। अश्विना। युवं। मदस्य। चारुणः। मध्वः। रातस्य। धिष्ण्या। अस्मे इति। आ।

१.५.८ बृहंतं। रयिं। शत॑ऽवंतं। सहस्रिणं। पुरु॑ऽक्षुं। विश्व॑ऽधायसं॥ ३॥ ॥पुरु। त्रा। चि

॥८८॥ त्। हि। वां। नरा। विऽह्वयंते। मनीषिणः। वाघत्ऽभिः। अश्विना। आ। गतं। जनासः

। वृक्तऽबर्हिषः। हविष्मंतः। अरं॑ऽकृतः। युवां। हवंते। अश्विना। अस्माकं। अद्य। वां।

अयं। स्तोमः। वाहिष्ठः। अंतमः। युवाभ्यां। भूतु। अश्विना। यः। ह। वां। मधुनः। दृ

तिः। आऽहितः। रथ॑ऽचर्षणे। ततः। पिबतं। अश्विना। तेन। नः। वाजिनीवसूइति

वाजिनीऽवसू। पश्वे। तोकाय। शं। गवे। वहतं। पीवरीः। इषः॥ ४॥ ॥उत। नः। दिव्याः

। इषः। उत। सिंधून्। अहः ऽविदा। अप। द्वाराऽइव। वर्षथः। कदा। वां। तौग्र्यः। वि

मद्धांश्वो। धत। समुद्रे। जहितः। नरा। ०। युवं। कण्वाय। नासत्या। अपिऽरिप्ताय। हर्म्ये। शश्व

त्। ऊतीः। दशस्यथः। ताभिः। आ। यातं। ऊतिऽभिः। नव्यसीभिः। सुशस्तिऽभिः।

यत्। वां। वृषण्वसूइतिवृषण्ऽवसू। हुवे। यथा। चित्। कण्वं। आवतं। प्रियऽ

राम ॥८१॥

तेननो वाजिनीवसू

मेधं। उपऽस्तुतं। अत्रिं। शिंजारं। अश्विना॥ ५॥ ॥यथा। उत। कृत्व्ये। धने। अं
शुं। गोषु। अगस्त्यं। यथा। वाजेषु। सोभरिं। एतावत्। वां। वृषण्वसूइतिवृषण्ऽ
वसू। अतः। वा। भूयः। अश्विना। गृणंतः। सुम्नं। ईमहे। रथं। हिरण्ययऽवंधुरं। हिर
ण्यऽअभीशुं। अश्विना। आ। हि। स्थाथः। दिविऽस्पृशं। हिरण्ययी। वां। रभिः। ईषा
। अक्षः। हिरण्ययः। उभा। चक्रा। हिरण्यया। ०। पराऽवतः। चित्। आ। गतं। उप। इ
मां। सुऽस्तुतिं। मम॥ ६॥ ॥आ। वहेथेइति। पराकात्। पूर्वीः। अश्नंतौ। अश्विना।
इषः। दासीः। अमर्त्या। आ। नः। द्युम्नैः। आ। श्रवःऽभिः। आ। राया। यातं। अश्वि
ना। पुरुऽचंद्रा। नासत्या। आ। दुहे। वां। प्रुषितऽप्सवः। वयः। वहंतु। पर्णिनः। अ
च्छ। सुऽअध्वरं। जनं। रथं। वां। अनुऽगायसं। यः। ईषा। वर्तते। सह। न। चक्रं। अभि।
बाधते। हिरण्ययेन। रथेन। द्रवत्पाणिऽभिः। अश्वैः। धीऽजवना। नासत्या॥ ७॥

प.पं.७
॥७८॥

युवं। मृगं। जागृऽवांसं। स्वदथः। वा। वृषणवसूइतिवृषण्ऽवसू। ता। नः। पृंक्तं। इ
षा। रयिं। ता। मे। अश्विना। सनीनां। वि घ्यातं। नवानां। यथा। चित्। चैद्यः। कशुः।
शतं। उष्ट्रानां। ददत्। सहस्रा। दश। गोनां। यः। मे। हिरण्यऽसंदृशः। दश। राज्ञः।
अमंहत। अधःऽपदाः। इत्। चैद्यस्य। कृष्टयः। चर्मऽम्नाः। अभितः। जनाः। माकिः।
एना। पथा। गात्। येन। इमे। यंति। चेदयः। अन्यः। न। इत्। सूरिः। ओहते। भूरिदा
वत्ऽतरः। जनः॥ ८ ॥ ॥महान्। इंद्रः। यः। ओजसा। पर्जन्यः। वृष्टिमान्ऽइव। स्तो
मैः। वत्सस्य। ववृधे। प्रऽजां। ऋतस्य। पिप्रतः। प्र। यत्। भरंत। वह्नयः। विप्राः। ऋ
तस्य। वाहसा। कण्वाः। इंद्रं। यत्। अक्रत। स्तोमैः। यज्ञस्य। साधनं। जामि। ब्रुव
ते। आयुधं। सं। अस्य। मन्यवे। विशः। विश्वाः। नमंत। कृष्टयः। समुद्रायऽइव।
सिंधवः। ओजः। तत्। अस्य। तित्विषे। उभेइति। यत्। संऽअवर्त्तयत्। इंद्रः। चर्मऽइ

राम
॥७८॥

वा।रोदसीइति॥ ८॥ ॥वि।चित्।वृत्रस्य।दोधतः।वज्रेण।शतऽपर्वणा॥शि
रः।बिभेद।वृष्णिना।इमाः।अभि।प्र।नोनुमः।विपां।अग्रेषु।धीतयः।अग्नेः।
शोचिः।न।दिद्युतः।गुहा।सतीः।उप।त्मना।प्र।यत्।शोचंत।धीतयः।कण्वाः।
ऋतस्य।धारया।प्र।तं।इंद्र।नशीमहि।रयिं।गोऽमंतं।अश्विनं।प्र।ब्रह्म।पूर्वऽ
चित्तये।अहं।इत्।हि।पितुः।परि।मेधां।ऋतस्य।जग्रभ।अहं।सूर्यःऽइव।अजनि
॥ १० ॥ ॥अहं।प्रत्नेन।मन्मना।गिरः।शुंभामि।कण्वऽवत्।येन।इंद्रः।शुष्मं।
इत्।दधे।ये।त्वां।इंद्र।न।तुस्तुवुः।ऋषयः।ये।च।तुस्तुवुः।मम।इत्।वर्धस्व।सुऽ
स्तुतः।यत्।अस्य।मन्युः।अध्वनीत्।वि।वृत्रं।पर्वऽशः।रुजन्।अपः।समुद्रं।ऐरयत्।
नि।शुष्णे।इंद्र।धर्णसिं।वज्रं।जघंथ।दस्यवि।वृषा।हि।उग्र।शृण्विषे।न।द्यावः।इंद्रं।
ओजसा।न।अंतरिक्षाणि।वज्रिणं।न।विव्यचंत।भूमयः॥ ११ ॥ ॥यः।ते।इंद्र।महीः।

प-पं-८
॥७५॥

अपः।स्तभुऽयमानः।आ।अशयत्।नि।तं।पद्यासु।शिश्नथः।यः।इमेइति।रोदसी
इति।महीइति।समीचीइतिसंऽईची।संऽअजग्रभीत्।तमःऽभिः।इंद्र।तं।गुहः।ये।
इंद्र।यतयः।त्वां।भृगवः।ये।च।तुस्तुवुः।मम।इत्।उग्र।श्रुधि।हवं।इमाः।ते।इं
द्र।पृश्नयः।घृतं।दुहते।आऽशिरं।एनां।ऋतस्य।पिप्युषीः।याः।इंद्र।प्रऽस्वः।त्वा।
आसा।गर्भं।अचक्रिरन्।परि।धर्मऽइव।सूर्यं॥१२॥ ॥त्वां।इत्।शवसः।पते।
कण्वाः।उक्थेन।वावृधुः।त्वां।सुतासः।इंदवः।तव।इत्।इंद्र।प्रऽनीतिषु।उत।प्रऽ
शस्तिः।अद्रिऽवः।यज्ञः।वितंतसाय्यः।आ।नः।इंद्र।महीं।इषं।पुरं।न।दर्षि।गोऽ
मंती।उत।प्रऽजां।सुऽवीर्यं।उत।त्यत्।आशुऽअश्व्यं।यत्।इंद्र।नाहुषीषु।आ।अ
ग्रे।विक्षु।प्रऽदीदयत्।अभि।व्रजं।न।तत्निषे।सूरः।उपाकऽचक्षसं।यत्।इंद्र।
मृळयासि।नः॥१३॥ ॥यत्।अंग।तविषीऽयसे।इंद्र।प्रऽराजसि।क्षितीः।महान्।

राम
॥७५॥

अपारः। ओजसा। तं। त्वा। हविष्मतीः। विशः। उप। ब्रुवते। ऊतये। उरुऽज्रयसं।
इंदुऽभिः। उपऽह्वरे। गिरीणां। संऽगथे। च। नदीनां। धिया। विप्रः। अजायत। अतः।
समुद्रं। उत्ऽवतः। चिकित्वान्। अव। पश्यति। यतः। विपानः। एजति। आत्। इत्। प्र
त्नस्य। रेतसः। ज्योतिः। पश्यंति। वासरं। परः। यत्। इध्यते। दिवा॥ १४ ॥ ॥ कण्वा
सः। इंद्र। ते। मतिं। विश्वे। वर्धंति। पौंस्यं। उतो इति। शविष्ठ। वृष्ण्यं। इमां। मे। इंद्र।
सुऽस्तुतिं। जुषस्व। प्र। सु। मां। अव। उत। प्र। वर्धय। मतिं। उत। ब्रह्मण्या। वयं। तुभ्यं।
प्रऽवृद्ध। वज्रिऽवः। विप्राः। अतक्ष्म। जीवसे। अभि। कण्वाः। अनूषत। आपः। न।
प्रऽवता। यतीः। इंद्रं। वनन्ऽवती। मतिः। इंद्रं। उक्थानि। ववृधुः। समुद्रंऽइव। सिंध
वः। अनु। त्वेऽमन्युं। अजरं॥ १५ ॥ ॥ आ। नः। याहि। पराऽवतः। हरिऽभ्यां। हर्यता
भ्यां। इमां। इंद्र। सुतं। पिब। त्वां। इत्। वृत्रहन्ऽतम। जेनासः। वृक्तऽबर्हिषः। हवंते।

प·पं·८

॥८०॥

वाज॑ऽसातये। अनु॑। त्वा॒। रोद॑सी॒ इति॑। उ॒भे इति॑। च॒क्रं। न। व॒र्ति॒। एत॑शं। अनु॑। सु॒वा॒नासः॑। इंद॑वः। मंद॑स्व। सु। स्वः॑ऽनरे। उ॒त। इं॒द्र॒। श॒र्य॒णा॑ऽवति। म॒त्स्व। वि॒वस्व॑तः। म॒ती। वव॒धा॒नः। उप॑। द्यवि॑। वृषा॑। व॒ज्री। अ॒रो॒र॒वी॒त्। वृ॒त्र॒ऽहा। सोम॑ऽपातमः॥१६॥ ॥ ऋ॒षिः। हि। पू॒र्व॒ऽजाः। असि॑। एकः॑। ईशा॑नः। ओज॑सा। इंद्र॑। चो॒ष्कू॒यसे॑। वसु॑। अ॒स्मा॒कं। त्वा॒। सु॒तान्। उप॑। वी॒त॒ऽपृ॑ष्ठाः। अ॒भि। प्रयः॑। श॒तं। व॒हं॒तु॒। हर॑यः। इ॒मां। सु। पू॒र्व्यां। धि॒यं। मधोः॑। घृ॒तस्य॑। पि॒प्यु॒षीं। कण्वाः॑। उ॒क्थेन॑। व॒वृ॒धुः॒। इंद्रं॑। इ॒त। वि॒ऽमहीनां। मेधे॑। वृ॒णी॒त। मर्त्यः॑। इंद्रं॑। स॒नि॒ष्युः॒। ऊ॒तये॑। अ॒र्वा॒चिं। त्वा॒। पुरु॑ऽस्तुत। प्रि॒यमे॑धऽस्तुता। ह॒री इति॑। सोम॑ऽपेयाय। व॒क्ष॒तः॒। श॒तं। अ॒हं। ति॒रिंदि॑रे। स॒हस्रं॑। पर्शौ॑। आ। द॒दे॒। राधां॑सि। याद्वा॑नां। त्रीणि॑। श॒तानि॑। अर्व॑तां। स॒हस्रा॑। दश॑। गोनां॑। द॒दुः॒। प॒ज्राय॑। साम्ने॑। उ॒त। आ॒न॒ट्। क॒कु॒हः॒। दिवं॑। उष्ट्रा॑न्। च॒तुः॒ऽयुजः॑। दद॑त्। श्रव॑सा। याद्वं॑। जनं॑॥१७॥

राम

॥८०॥

प्र। यत्। वः। त्रिऽस्तुभं। इषं। मरुतः। विप्रः। अक्षरत्। वि। पर्वतेषु। राजथ। यत्। अंग।
तविषीऽयवः। यामं। शुभ्राः। अचिध्वं। नि। पर्वताः। अहासत। उत। ईरयंत। वायुऽभिः
। वाश्रासः। पृश्निऽमातरः। धुक्षंत। पिप्युषीं। इषं। वर्पंति। मरुतः। मिहं। प्र। वेपयंति।
पर्वतान्। यत्। यामं। यांति। वायुऽभिः। नि। यत्। यामाय। वः। गिरिः। नि। सिंधवः। विऽ
धर्मणे। महे। शुष्माय। येमिरे॥ १८ ॥ ॥ युष्मान्। ऊं इति। नक्तं। ऊतये। युष्मा
न्। दिवा। हवामहे। युष्मान्। प्रऽयति। अध्वरे। उत। ऊं इति। से। अरुणऽप्सवः
चित्राः। यामेभिः। ईरते। वाश्राः। अधि। स्नुना। दिवः। सृजंति। रश्मिं। ओजसा।
पंथां। सूर्याय। यातवे। ते। भानुऽभिः। वि। तस्थिरे। इमां। मे। मरुतः। गिरं। इमं। स्तो
मं। ऋभुक्षणः। इमं। मे। वनत। हवं। त्रीणि। सरांसि। पृश्नयः। दुदुह्रे। वज्रिणे। म
धु। उत्सं। कवंधं। उद्रिणं॥ १९ ॥ ॥ मरुतः। यत्। ह। वः। दिवः। सुम्नऽयंतः। हवामहे।

यमंहिष्ठासु०

प॰ पं॰ ८

॥ ८१ ॥

आ। तु। नः। उप। गंतन। ॐ। रुद्राः। ऋभुक्षणः। इमे। उत। प्रऽचेतसः। मदे। आ। नः।
। रयिं। मदऽच्युतं। पुरुऽक्षुं। विश्वऽधायसं। इयर्त। मरुतः। दिवः। अधि। इव। यत।
गिरीणां। यामं। शुभ्राः। अचिध्वं। सुवानैः। मंदध्वे। इंदुऽभिः। एतावतः। चित्। एषां।
सुम्नं। भिक्षेत। मर्त्यः। अदाभ्यस्य। मन्मऽभिः॥ २०॥ ॥ ये। द्रप्साःऽइव। रोदसी
इति। धमंति। अनु। वृष्टिऽभिः। उत्सं। दुहंतः। अक्षितं। उत। ऊं इति। स्वानेभिः।
ईरते। उत। रथैः। उत। ऊं इति। वायुऽभिः। उत। स्तोमैः। पृश्निऽमातरः। येन। आ
व। तुर्वशं। यदुं। येन। कण्वं। धनऽस्पृतं। राये। सु। तस्य। धीमहि। इमाः। ऊं इति।
वः। सुऽदानवः। घृतं। न। पिप्युषीः। इषः। वर्धान्। काण्वस्य। मन्मऽभिः। क्व। नूनं।
सुऽदानवः। मदथ। वृक्तऽबर्हिषः। ब्रह्मा। कः। वः। सपर्यति॥ २१॥ ॥ नहि। स्म।
यत्। ह। वः। पुरा। स्तोमेभिः। वृक्तऽबर्हिषः। शर्धान्। ऋतस्य। जिन्वथ। सं। ऊं इति।

राम

॥ ८१ ॥

स्ये। महती:। अपः। सं। क्षोणीइति। सं। ऊंइति। सूर्यं। सं। वज्रं। पर्वऽशः। दधुः। वि। वृ
त्रं। पर्वऽशः। ययुः। वि। पर्वतान्। अराजिनः। चक्राणाः। वृष्णि। पौंस्यं। अनु। त्रितस्य। यु
ध्यतः। शुष्मं। आवन्। उत। क्रतुं। अनु। इंद्रं। वृत्रऽतूर्ये। विद्युत्ऽहस्ताः। अभिऽद्यवः।
शिप्राः। शीर्षन्। हिरण्ययीः। शुभ्राः। वि। अंजत। श्रिये॥ २२ ॥ ॥ उशना। यत्। पराऽ
वतः। उक्ष्णः। रंध्रं। अयातन। द्यौः। न। चक्रदत्। भिया। आ। नः। मखस्य। दावने। अ
श्वैः। हिरण्यपाणिऽभिः। देवासः। उप। गंतन। यत्। एषां। पृषतीः। रथे। प्रष्टिः। वहति
। रोहितः। यांति। शुभ्राः। रिणन्। अपः। सुऽसोमे। शर्यणाऽवति। आर्जीके। पस्त्याऽव
ति। ययुः। निऽचक्रया। नरः। कदा। गच्छाथ। मरुतः। इत्था। विप्रं। हवमानं। मार्डीके
भिः। नाधमानं॥ २३ ॥ ॥ कत्। ह। नूनं। कधऽप्रिया। पिता। पुत्रं। न। हस्तयोः। दधिध्वे। वृक्तऽबर्हिषः
इति। सु। नः। वज्रऽहस्तैः। कण्वासः। अग्निं। मरुत्ऽभिः। स्तुषे। हिरण्यऽवाशीभिः।

तेआ॒ऽमु॒भिर्वि॑ना॒स्थि॒रे॑।

१.पं.८ ओइ॑ति। सु। वृ॒क्लः। प्र॒। य॒ज्यून्। आ। नव्य॑से। सु॒वि॒ताय॑। व॒वृत्यां॑। चि॒त्रऽवा॑जान्। गिर॑

॥८२॥ यः। चि॒त्। नि। जि॒हृते॑। पर्श॑नासः। म॒न्यमा॑नाः। पर्व॑ताः। चि॒त्। नि। ये॒मिरे॑। आ। अ॒स्या॒ऽ

यावा॑नः। व॒हंति॑। अं॒तरि॑क्षेण। पत॑तः। धा॒तार॑ः। स्तु॒व॒ते। वयः॑। अ॒ग्निः। हि। जनि॑। पू॒र्व्यः॑

। छं॒दः। न। सूरः॑। अ॒र्चिषा॑। ऽ॑। २४ ॥ ॥आ। नः॑। वि॒श्वाभिः॑। ऊ॒तिऽभिः॑। अ॒श्विना॑। गच्छ॑

तं। यु॒वं। दृ॒स्रौ। हिर॑ण्यवर्त्तनी॒इति॒हिर॑ण्यऽवर्त्तनी। पिब॑तं। सो॒म्यं। मधु॑। आ। नू॒नं।

यातं। अ॒श्विना॑। रथे॑न। सूर्य॑ऽत्वचा। भुजी॒इति॑। हिर॑ण्यऽपेशसा। कवी॒इति॑। गंभी॑रऽ

चे॒तसा। आ। यातं। न॒हु॑षः। परि॑। आ। अं॒तरि॑क्षात्। सुवृक्तिऽभिः॑। पिबा॑थः। अ॒श्वि

ना। मधु॑। कण्वा॑नां। सव॑नि। सु॒तं। आ। नः॑। यातं। दि॒वः। परि॑। आ। अं॒तरि॑क्षात्। अ॒धऽ

प्रि॒या। पु॒त्रः। कण्व॑स्य। वां। इ॒ह। सु॒साव॑। सो॒म्यं। मधु॑। ऽ॑। उप॑ऽश्रुति। अ॒श्विना॑। सोम॑ऽ

पीतये। स्वाहा॑। स्तोम॑स्य। व॒र्धना॑। प्र। क॒वी॒इति॑। धी॒तिऽभिः॑। न॒रा॥ २५॥ ॥यत्। चि॒त्।

आनोयात॑र

राम

॥८२॥

ह्वि। वां। पुरा। ऋषयः। जुहूरे। अवसे। नरा। आ। यातं। अश्विना। आ। गतं। उप। इमां। सुऽस्तुतिं। मम। दिवः। चित्। रोचनात्। अधि। आ। नः। गंत। स्वःऽविदा। धीभिः। वत्सऽ
प्रचेतसा। स्तोमेभिः। हवनऽश्रुता। किं। अन्ये। परि। आसते। अस्मत्। स्तोमेभिः। अ
श्विना। पुत्रः। कण्वस्य। वां। ऋषिः। गीःऽभिः। वत्सः। अवीवृधत्। आ। वां। विप्रः। इ
ह। अवसे। अह्वत्। स्तोमेभिः। अश्विना। आरिप्रा। वृत्रहन्ऽतमा। ता। नः। भूतं। मयःऽ
भुवा। आ। यत्। वां। योषणा। रथं। अतिष्ठत्। वाजिनीवसू इति वाजिनीऽवसू। विश्वा
नि। अश्विना। युवं। प्र। धीतानि। अगच्छतं॥ २६॥ ॥आ। तः। सहस्रऽनिर्निजा। रथे
न। आ। यातं। अश्विना। वत्सः। वां। मधुऽमत्। वचः। अशंसीत्। काव्यः। कविः। पुरुऽ
मंद्रा। पुरुवसू इति पुरुऽवसू। मनोतरा। रयीणां। स्तोमं। मे। अश्विनौ। इमं। अभि। व
ह्नी इति। अनूषातं। आ। नः। विश्वानि। अश्विना। धत्तं। राधांसि। अह्रया। कृतं। नः। ऋ

पञ्चासस्या॰ अन्तःसहस्र॰

प॰पं॰८

॥८१॥

क्षिय॒ऽवतः। मा। नः। रीरधतं। निदे। ॐ। अंबरे। ॐ। यः। वां। नासत्यौ। ऋषिः। गीः ऽभिः। वत्सः। अवीवृधत्। तस्मै। सहस्र ऽनिर्णिजं। इषं। धत्तं। घृत ऽश्चुतं॥ २७ ॥ ॥ प्र। अस्मै। ऊर्जं। घृत ऽश्चुतं। अश्विना। यच्छतं। युवं। यः। वां। सुम्नाय। तुस्तवत्। वसु ऽयात्। शुभः। पतीइति। आ। नः। गंतं। रिशादसा। इमं। स्तोमं। पुरु ऽभुजा। कृतं। नः। सु ऽश्रियः। नरा। इमा। दातं। अभिष्टये। आ। वां। विश्वाभिः। ऊतिऽभिः। प्रिय ऽमेधाः। अहूषत। राजंतौ। अध्वराणां। अश्विना। यामऽहूतिषु। ॐ। मयः ऽभुवा। अश्विना। शं ऽभुवा। युवं। यः। वां। विपन्यूइति। धीतिऽभिः। गीः ऽभिः। वत्सः। अवीवृधत्। याभिः। कण्वं। मेधऽअतिथिं। याभिः। वशं। दशऽव्रजं। याभिः। गोऽशर्यं। आवतं। ताभिः। नः। अवतं। नरा॥ २८ ॥ ॥ याभिः। नरा। त्रसदस्युं। आवतं। कृत्व्ये। धने। ताभिः। सु। अस्मान्। अश्विना। प्र। अवतं। वाज ऽसातये। प्र। वां। स्तोमाः। सु ऽवृक्तयः। गिरः। वर्धंतु। अश्विना। पुरु ऽत्रा। ॐ। पुरु ऽस्पृहा। त्री। णि। पदानि। अश्वि

आनोगंतं+

एम

॥८२॥

वृत्रहंतमा। नानोभूतं

नो:।आविः।संति।गुहा।परः।कवी इति।ऋतस्य।पत्मऽभिः।अर्वाक्।जीवेभ्यः।परि।
॥२२॥ ॥आ।नूनं।अश्विना।युवं।वत्सस्य।गंत।अवसे।प्र।अस्मै।यच्छतं।अवृकं।पृ
थु।छर्दिः।युयुतं।याः।अरातयः।यत्।अंतरिक्षे।यत्।दिवि।यत्।पंच।मानुषान्।अनु।
नृम्णं।तत्।धत्तं।अश्विना।ये।वां।दंसांसि।अश्विना।विप्रासः।परिऽमामृशुः।एव।इत्
।काण्वस्य।बोधतं।अयं।वां।घर्मः।अश्विना।स्तोमेन।परि।सिच्यते।अयं।सोमः।म
धुऽमान्।वाजिनीवसू इति वाजिनीऽवसू।येन।वृत्रं।चिकेतथः।यत्।अप्ऽसु।यत्।
वनस्पतौ।यत्।ओषधीषु।पुरुऽदंससा।कृतं।तेन।मा।अविष्टं।अश्विना॥ ३०॥ ॥य
त्।नासत्या।भुरण्यथः।यत्।वा।देवा।भिषज्यथः।अयं।वां।वत्सः।मतिऽभिः।न।विं
धते।हविष्मंतं।हि।गच्छथः।आ।नूनं।अश्विनोः।ऋषिः।स्तोमं।चिकेत।वामया।आ।
सोमं।मधुऽमत्ऽतमं।घर्मं।सिंचात्।अथर्वणि।आ।नूनं।रघुऽवर्तनिं।रथं।तिष्ठाथः।अ

प॰पं॰८ वा॰
॥८७॥

एवे॰काण्वस्य बोधतं॥

श्विना।आ।वां।स्तोमाः।इमे।मम।नभः।न।चुच्यवीरत।यत्।अद्य।वां।नासत्या।उक्थैः
।आऽचुच्युवीमहि।यत्।वाणीभिः।अश्विना।ण।यत्।वां।कक्षीवान्।उत।यत्।विऽ
अश्वः।ऋषिः।यत्।वां।दीर्घऽतमाः।जुहाव।पृथी।यत्।वां।वैन्यः।सदनेषु।एव।इत्
।अतः।अश्विना।चेतयेथां॥ ३१॥ ॥यातं।छर्दिःऽपौ।उत।नः।परःऽपा।भूतं।जगत्ऽ
पौ।उत।नः।तनूऽपा।वर्त्तिः।तोकाय।तनयाय।यातं।यत्।इंद्रेण।सऽरथं।याथः।अश्वि
ना।यत्।वा।वायुना।भवथः।सऽओकसा।यत्।आदित्येभिः।ऋभुऽभिः।सऽजोषसा।य
त्।वा।विष्णोः।विऽक्रमणेषु।तिष्ठथः।यत्।अद्य।अश्विनौ।अहं।हुवेय।वाजऽसात
ये।यत्।पृतऽसु।तुर्वणे।सहः।तत्।श्रेष्ठं।अश्विनोः।अवः।आ।नूनं।यातं।अश्विना।इ
मा।हव्यानि।वां।हिता।इमे।सोमासः।अधि।तुर्वशे।यदौ।इमे।कण्वेषु।वां।अथ।यत्।
नासत्या।पराके।अर्वाके।अस्ति।भेषजं।तेन।नूनं।विऽमदाय।प्रऽचेतसा।छर्दिः।वत्सा

राम
॥८७॥

य। यच्छतं॥ ३२॥ ॥अभुत्सि। ऊं इति। प्र। देव्या। साकं। वाचा। अहं। अश्विनोः। वि। आवः।
देवि। आ। मतिं। वि। रातिं। मर्त्येभ्यः। प्र। बोधय। उषः। अश्विना। प्र। देवि। सूनृते। महि। प्र।
यज्ञऽहोतः। आनुषक्। प्र। मदाय। श्रवः। बृहत्। यत्। उषः। यासि। भानुना। सं। सूर्येण।
रोचसे। आ। ह। अयं। अश्विनोः। रथः। वर्त्तिः। याति। नृऽपाय्यं। यत्। आऽपीतासः। अंशवः।
गावः। न। दुक्रे। ऊधऽभिः। यत्। वा। वाणीः। अनूषत। प्र। देवऽयंतः। अश्विना। प्र। द्युम्ना
य। प्र। शवसे। प्र। नृऽसह्याय। शर्मणे। प्र। दक्षाय। प्रऽचेतसा॥ यत्। नूनं। धीभिः। अश्वि
ना। पितुः। योना। निऽसीदथः। यत्। वा। सुम्नेभिः। उक्थ्या॥ ३३॥ ॥यत्। स्थः। दीर्घऽ
प्रसद्मनि। यत्। वा। अदः। रोचने। दिवः। यत्। वा। समुद्रे। अधि। आऽकृते। गृहे। अतः। आ
। यातं। अश्विना। यत्। वा। यज्ञ। मनवे। संऽमिमिक्षथुः। ६। बृहस्पतिं। विश्वान्। देवान्।
अहं। हुवे। इंद्राविष्णू इति। अश्विनौ। आशुऽहेषसा। या। नु। अश्विना। हुवे। सुऽदंससा।

एते काण्वस्य बोधतं॥

१०५०८
॥८५॥

गृभे। कृता। ययोः। अस्ति। प्र। नः। सख्यं। देवेषु। अधि। आप्यं। ययोः। अधि। प्र। यज्ञाः। अ
सूरे। संति। सूरयः। ता। यज्ञस्य। अध्वरस्य। प्रऽचेतसा। स्वधाभिः। या। पिबतः। सोम्यं। म
धु। यत्। अद्य। अश्विनौ। अपाक्। यत्। प्राक्। स्थः। वाजिनीवसू इति वाजिनीऽवसू। य
त्। द्रुह्यवि। अनवि। तुर्वशे। यदौ। हुवे। वां। अथ। मा। आ। गतं। यत्। अंतरिक्षे। पतथः
। पुरुऽभुजा। यत्। वा। इमे इति। रोदसी इति। अनु। यत्। वा। स्वधाभिः। अधिऽतिष्ठथः।
रथं। ७॥ ३४ ॥ ॥ त्वं। अग्ने। व्रतऽपाः। असि। देवः। आ। मर्त्येषु। आ। त्वं। यज्ञेषु। ईड्यः।
त्वं। असि। प्रऽशस्यः। विदथेषु। सहंत्य। अग्ने। रथीः। अध्वराणां। सः। त्वं। अस्मत्। अ
प। द्विषः। युयोधि। जातऽवेदः। अदेवीः। अग्ने। अरातीः। अंति। चित्। संतं। अह। यज्ञं। म
र्तस्य। रिपोः। न। उप। वेषि। जातऽवेदः। मर्तौः। अमर्त्यस्य। ते। भूरि। नाम। मनामहे। वि
प्रासः। जातऽवेदसः। ३५॥ ॥ विप्रं। विप्रासः। अवसे। देवं। मर्तासः। ऊतये। अग्निं। गीः

राम
॥८५॥

भिः। हवामहे। आ। ते। वत्सः। मनः। यमत्। परमात्। चित्। सधऽस्थात्। अग्ने। त्वांऽ
कामया। गिरा। पुरुऽत्रा। हि। सऽदृङ्। असि। विशः। विश्वाः। अनु। प्रऽभुः। समत्ऽसु।
त्वा। हवामहे। समत्ऽसु। अग्निं। अवसे। वाजंऽयंतः। हवामहे। वाजेषु। चित्रऽराधसं।
प्रत्नः। हि। कं। ईड्यः। अध्वरेषु। सनात्। च। होता। नव्यः। च। सत्सि। स्वां। च। अग्ने। त
न्वं। पिप्रयस्व। अस्मभ्यं। च। सौभगं। आ। यजस्व॥ २६॥ ॥इतिपंचमा८
केअष्टमोऽध्यायः॥ ॥शुभंभवतु॥ ॥छ॥ ॥

॥ पंचमाष्टकः समाप्तः॥